।। श्रीकृष्णाय नमः ।।



# अथ श्रीनृसिंहविजयमहानाटकम् ।

## प्रथमोऽङ्कः ।

साकृतिमप्याकृतिगुणरहितं सगुणं नमामि तं कृष्णम् ।।
युवतीभिः क्रीडन्तं यशोदयाऽङ्के निरन्तरं विधृतम् ।।१।।

अपि च ।

कविरपि यो वागीशः सौम्योऽप्यथ मङ्गलात्मकः ।।
महसां निधिरपि भक्तेः केतुर्द्विजराजो वस्स वल्लभो पायात् ।।२।।

किञ्च ।

श्रीगोवर्द्धनधारिणि प्रसृमरप्रेमप्रवाहान्विताः
मायावादिषु वह्निजालसदृशाः स्वीये कृपाम्भोधयः ।।
स्वोद्भूतेषु जयन्ति ये च नितरां वात्सल्यवृक्षाङ्कुराः
श्रीमद्वल्लभनन्दनस्य विलसन्त्येते कटाक्षाः शुभाः ।।३।।

(नान्द्यन्ते ।)

**सूत्रधारः** - अलमतिकालातिक्रमेण । आदिष्टोऽस्मि श्रीमद्बालकृष्णचरणनलिन-मिलिन्दायमान-मानसेन स्वाश्रितजनसितच्छदमानसेन श्रीमद्-वल्लभान्ववायप्रभावलयनारायणेन सद्धर्मपरायणेन समग्रोदग्रगुण-ग्रामालङ्कृतविग्रहेण प्रबलतरप्रतापानलतरलज्वालाजालभस्मी-कृतप्रत्यर्थियशस्तूलोत्करेण दानोत्करेण गोस्वामिवरेण श्रीमद्-

गोवर्द्धनजीमहाराजशर्मणा यथा विद्वद्वृन्दवृन्दिष्ठेयं परिषद्रमणीय-रूपकाभिनयेन रञ्जनीयेति । तद्भवतु । दयितामाहूय संमंत्रये ।

(नेपथ्याभिमुखमवलोक्य ।)

आर्ये इतस्तावत् ।

(प्रविश्य ।)

**नटी** - अज्ज उत्त एमह्मि आणवेदु अज्जो करणिज्जं (आर्यपुत्र एषाऽस्मि आज्ञापयत्वार्यः करणीयम्) ।

**सूत्रधारः** - (''**आदिष्टोऽस्मी**''त्यादि पठति । स्वविचारं [प्रकटयति] ।) प्रिये वसिष्ठवामदेवविश्वामित्रकल्पानामनल्पानां विदुषां दर्शनेन प्रक्षुब्धोऽस्मीति न किमपि करणीयं स्मरामि ।

**यद्यपि नाट्यकृतां किल धाष्टर्यं लोके प्रसिद्धतरम् ।।**
**तदपि मरुद्वेगाद्दृढवृक्ष इव कम्पते मनः क्षोभात् ।।४।।**

**नटी** - एवण्णेदं तहवि । [ एवं नु इदं तथापि । ] (संस्कृतमाश्रित्य ।)

**प्रपन्नभयभेत्तारमुत्साहोज्जीवनं प्रभुम् ।।**
**नृसिंहं स्मर ते प्रेष्ठ स इष्टं पूरयिष्यति ।।५।।**

**सूत्रधारः** - (स्मृतिमभिनीय ।) हन्त प्रिये भूर्युपकृतोऽस्मि चित्तस्थमपि विस्मृतं पुनः स्मारितं वचनरचनया यतस्त्वं हृदयङ्गमाऽसि खलु ।

**करस्थं रत्नमस्मृत्वा गामी रत्नाकरं प्रति ।।**
**निवर्त्य स्थापितः सम्यक् स्वास्पदं यत्नतः प्रिये ।।६।।**

तेन अत्रभवतोऽस्यैव महाराजस्य धर्मात्मजेन एतत्कृपालब्धमहोदयेन साम्प्रतं तीर्थयात्रां परिसमाप्य श्रीमद्बालकृष्णसेवनेन कृतार्थीकृतान्तः-करणेन श्रीमद्गोकुलोत्सवतनूभवेन जीवनाख्येन ग्रथितेन नव्येन श्रीनृसिंहविजयनाम्ना नाटकेनेयं परिषत्सन्तोषयितव्या । यस्य किल ।

**साहित्यसङ्गीतसुधाप्रवाहयोश्-**
**चेतो निमग्नं ननु मेधया भृशम् ।।**

**नटी** - आर्यपुत्र आश्चर्यम् आश्चर्यम् । असङ्गतमिव प्रतिभाति । एकमेव चेतो मेधया सह कथं द्वयोर्मध्ये निमग्नम् ।

**सूत्रधारः** - अयि मुग्धे दृष्टान्तेन बोधयामि शृणु ।

**प्राप्य प्रयागं सरितोः प्रवाहयोः**
**कान्तासखस्तीर्थपरो यथा नरः ।।७।।**

**नटी** - (सहर्षम् ।) आर्यपुत्रैवमेव ।

(प्रविश्य ।)

**पारिपार्श्वकः** - भाव कोऽसौ श्रीमद्गोकुलोत्सवजीमहाराजः । यस्येदृशः पुत्रः ।

**सूत्रधारः** - मारिष कलितमश्छटोच्छेदने भास्वन्तं तं न जानासि । शृणु ।

**नृपमौल्यर्चितपदसौ सिंहौजाः शान्तविग्रहः शान्तः ।।**
**हरिलीलामृतमग्नो विद्याविनयादिसम्पदां स्थानम् ।।८।।**

**जयति स सततं लोके यं स्मृत्वा मुच्यते भयात् सद्यः ।।**
**नानांहःसङ्घानां मधुभिद्भक्तेर्भवत्यथो पात्रम् ।।९।।**

**पारिपार्श्वकः** - (सश्लाघम् ।) अहो वर्णननैपुण्यं भावस्य यद्वर्णनार्याद्वियपादाष्टकाद्याक्षरैर्ग्रन्थनामापि सूचितम् । सूचितं तत् ।

**नटी** - आर्यपुत्र कः पुनरस्य शिक्षयिता भवेत् ।

**सूत्रधारः** - दयिते कथयामि सोऽसौ ।

**जीवातुरज्ञानमहामयस्य वपुर्धरस्तर्क इव प्रगल्भः ।।**
**नवीनकाव्यग्रथने सुशीलो जीवोपमो यः खलु वैद्यनाथः ।।१०।।**

**नटी** - (सहर्षम् ।) साधु आर्यपुत्र साधु । यत्पुनर्वचनचातुर्येण वर्णनपद्यपादचतुष्काद्यवर्णैः कवेरभिधानमपि भणितमिति भृशमभिनन्दामि पुनः परमस्यापि कः शिक्षयिता भवेत् ।

**सूत्रधारः** - प्रिये शृणु ।

**तच्छिक्षकस्तु तर्कालङ्काराद्वैतशास्त्रविद्वर्यः ।।**
**जयति स रघुनाथाह्वो विप्रेन्द्रः पर्वतोपाह्वः ।।११।।**

**नटी** - आर्यपुत्र कः पुनरस्य कवेः सङ्गीतकलायाः शिक्षयिता भवेत् ।

**सूत्रधारः** - प्रिये शृणु ।

**सङ्गीतामृतवार्धिप्रमथनमन्दरगिरीन्द्रवर्यो यः ।।**
**सौहार्दरत्ननिकरो गौडो विप्रः कृपारामः ।।१२।।**

**नटी** - तस्यापि कः शिक्षयिता भवेत् ।

**सूत्रधारः** - प्रिये शृणु ।

**यः सङ्गीतकलाया अधिदैवं कान्यकुब्जवर्यश्च ।।**
**हरिरामाह्वः काश्यां जयतितरां वाजपेय्युपाभिख्यः ।।१३।।**

**नटी** - आर्यपुत्र महतीयं गुरुपरम्परा ।

**सूत्रधारः** - आर्ये भगवत्कृपाकटाक्षामृतपूर्णानां किमसुलभम् ।

**नटी** - आर्यपुत्र एवमेवैतत् ।

**सूत्रधारः** - अयि वामोरु भवति कालातिक्रमः तदारभ्यतां सङ्गीतकं कुशीलवैः सह ।

**नटी** - कतमां वेलां समाश्रित्य सङ्गीतकमारभे ।

**सूत्रधारः** - इमामेव प्रावृड्वेलां समाश्रित्य ।

**नटी** - तह [ तथा ](इति गायति ।) (संस्कृतमाश्रित्य ।)

**निबिडोत्तुङ्गपयोधरयुक्ता रसदानतत्परा सुखदा ।।**
**अतिचपला चित्राम्बरलक्ष्मीः सुभगा विभात्यसौ वेला ।।१४।।**

**सूत्रधारः** - (श्रुतिसुखमभिनीय ।) अयि प्रिये तेन त्वत्सदृशीयं वेलेति निपुणं निरूपितम् । गीतं च ।

**ततकण्ठस्वनयोर्ननु भेदं विवृणोति नाद्य कर्णो मे ।।**
**त्वन्मुखमेतद्दृष्ट्वा शक्नोत्यनुमातुमीषदिह दृष्टिः ।।१५।।**

(नेपथ्ये ।)

अहह मत्कदनोद्युक्तं मदनं वर्षावसरवर्णनगीतेन प्रबलयन्ती का पुनरेषा ।

**सूत्रधारः** - (ससम्भ्रमम् । नेपथ्यमभिवीक्ष्य ।) प्रिये पश्य पश्य असमशरज्वर-पीडितत्वेन त्वद्गीतश्रवणसञ्जातरोषा ह्येषा भगवती दितिरित एवाभिवर्तते । तन्नात्र स्थातुमुचितम् ।

(इति निष्क्रान्ताः ।)

**प्रस्तावना ।**

(ततः प्रविशति कामयमाना देवी दितिः ।)

**दितिः** - अहो बलवदस्वस्थं मानसं केन प्रकारेण विनोदयामि । (स्वगतम् ।) हृच्छयः प्रबलोऽनवसरः किलार्यपुत्रसामीप्यस्य । भवतु सखीजनालापेन सम्भावयिष्य आत्मानम् । (प्रकाशम् ।) हला प्रसूनलतिके इतः इतः ।

(प्रविश्य ।)

**सखी** - एषाऽस्मि । अभिमतार्थकथनेन कृतार्थयतु प्रियसखी ।

**दितिः** - हला प्रसूनलतिकेऽहमेकाकिनीति विनोदार्थमाकारिताऽसि ।

**प्रसूनलतिका** - निजाश्रमपुण्यारण्यश्रीनिरीक्षणेन विनोदयत्वात्मानं भवती ।

**दितिः** - (सर्वतोऽवलोक्य ।) हला प्रसूनलतिके पश्य पश्य ।

**सतृणाऽनुकरोत्येषा पद्मरागविचित्रिताम् ।।**
**गारुत्मतस्थलीं भूमिस्त्विन्द्रगोपैरलङ्कृता ।।१६।।**

**प्रसूनलतिका** - (सश्लाघम् ।) हला अहं पुनरिमां सुषमां पश्यामि । पश्य ।

**तृणमयमृदुलास्तरणे पदयुग्मं पाटलं हरत्येतत् ।।**
**शैवलजालसमाकुलकासारगकञ्जयुगशोभाम् ।।१७।।**

**दितिः** - (स्मित्वा सभ्रूभङ्गम् ।) किं वृथैव प्रलपसि । पश्य ।

**उत्कूलह्रदिनीह्रदप्रविलसन्नीरेषु पद्मिन्यहो**
**आकण्ठं नियतं निमज्य परितो भाति प्ररागान्विता ।।**

**सम्प्राप्तुं कमितारमाशु मिहिरं ह्याश्चर्यपुञ्जार्चितं**

**मृद्वङ्गी कुरुते तपोविधिमहो कन्दर्पदर्पाहता ।।१८।।**

किञ्च । हला प्रियसखि । शृणु तावत् ।

**तरुणजनानां हृदये करोमि काण्डप्रहारमधुना किम् ।।**

**मदनेनेत्थं पृष्टाः कुरु कुरु कुर्विति वदन्ति पिकनिचयाः ।।१९।।**

(ऊद्ध्र्वमवलोक्य । अङ्गुल्या निर्दिश्य ।) हला पश्य पश्य । अत एव ।

**अम्बरावरणमाकलय्य तत्संस्थितस्य मदनस्य दृश्यते ।।**

**चाप एष सुसुमैर्विचित्रितो हन्तुमार्तमबलाजनं शरैः ।।२०।।**

**प्रसूनलतिका** - (स्थगितं विलोक्य । स्मित्वा ।) अयि प्रियसखि त्वं कथं विह्वलेव संवृत्ता ।

**दितिः** - (सलज्जं स्मित्वा ।) हला प्रसूनलतिके । आत्मानमिव मां समर्थयसि । (इति करेणाकृष्य सखीं दृढमालिङ्गति ।)

**प्रसूनलतिका** - अहह मुञ्च मुञ्च । मारीचस्य वक्षःस्थलमिव त्वद्वक्षोजपीडासहं नो मदङ्गम् ।

**दितिः** - (सत्वरमुत्सृज्य । सक्रोधमिव । सस्मितम् ।) हला प्रसूनलतिके । किमकाण्ड उपहासप्रवृत्तिः ।

(इति रदैरदच्छदं निष्पीड्य सलज्जं तूष्णीं तिष्ठति ।)

**प्रसूनलतिका** - (स्वगतम् ।) बलवन्मन्मथक्लान्ता प्रियसखी । तद् भवतु मारीचस्य उपकण्ठं प्रापयामि । (प्रकाशम् ।) अयि प्रियसखि पश्य पश्य नानाप्रसूनाकल्पालङ्कृतया कठिनोत्तुङ्गफलवक्षोजहृद्यया नवकिसलया-ऽधरकान्तयाऽभिनवया कान्तयेव वल्ल्या संश्लिष्टमालोकय तरुणं क्रीडासहकारमिव हवनागारसमीपे तरुणं क्रीडासहकारम् । (इति दितिं करे धृत्वा परिक्रामति ।)

**दितिः** - (सश्लाघम् ।) अयि प्रसूनलतिके पश्य पश्य ।

**जडोऽप्यत्र रसालोऽयं व्रतत्याऽऽश्लिष्यतेऽनिशम् ।।**

**प्रसूनलतिका -**

**त्वयाऽपि परिरब्धव्यो मारीचः कञ्जलोचनः ।।२१।।**

**दितिः** - (सक्रोधमिव ।) किमद्य ते जिह्वां प्रलापः प्रविष्टः । (इत्यङ्गुल्या सखीं तर्जयति ।)

**प्रसूनलतिका** - (स्वगतम् ।) नियतमेषा कामयमाना समीपं प्राप्ता खलु स्वकान्ताधिष्ठिताग्न्यागारस्य । तन्नेदानीमत्र स्थातुमुचितम् । (प्रकाशम् ।) (ससम्भ्रमं सानुस्मरणमिव ।) हला मया रचिता कुसुममालिका तत्रैव विस्मृता तद्ग्रहीतुं गच्छामि । (इति निष्क्रान्ता ।)

**दितिः** - (स्वगतम् ।) इयं सखी नूनं कामक्लान्तां मां ज्ञात्वैव छद्मना गतेति प्रतिभाति किमधुनाऽनुष्ठेयम् । अकाण्डः किल महर्षेः सामीप्यस्य । (पुनर्विमृश्य ।) भवतु । भगवतो हुताशनस्य दर्शनमिषेण भजामि सामीप्यमार्यपुत्रस्य । (प्रकाशम् ।) सम्प्राप्तः सन्ध्याकालः वन्दनीयो भगवान् हुतवहः ।

(ततः प्रविशति सायंतनकर्म कुर्वन् भगवान् कश्यपः ।)

**दितिः** - (परिक्रम्य ।) इदमार्यपुत्राधिष्ठितमग्न्यागारम् । तावत्प्रविशामि भगवतो हुताशनस्य दर्शनाय । (इति नाट्येन प्रविश्य ।) (स्वगतम् ।) अहो चित्तैकाग्र्यं कर्मण्यार्यपुत्रस्य यत्समीपस्थामपि मां नावधारयति । भवतु । (प्रकाशम् ।) (सस्मितम् ।) आर्यपुत्र । पश्य पश्य वर्षासामयिकमिदमाश्रमरामणीयकम् ।

**पवनवलनबलाद्धोरणिर्वारिदानां**
**सृजति सलिलधारास्तेन संमृष्टपत्राः ।।**
**व्रततिसुवृतवृक्षा गुल्मवीरुत्तृणानि**
**नयनहृदयसौख्यान्मण्डयन्त्याश्रमं नः ।।२२।।**

किञ्च ।

**सरसा रसाऽभवदसावरसत्वं संविमुच्य रसदवशात् ।।**
**हरिदावरणं धृत्वा ऋतूचितं बीजधारणं कुरुते ।।२३।।**

**कश्यपः** - (भ्रूसंज्ञया स्वीकरोति ।)

**दितिः** - (सतृष्णम् ।) अये हृदयङ्गमविविधविहङ्गमस्वनितगर्भितस्तनित-श्रवणानन्ददे गिरिशृङ्गविशृङ्खलप्रसृतनिर्झरतृणावलम्बिसलिल-सीकरानुकृतमुक्ताफलनिकुरम्बे चञ्चच्छम्पाशंकासुलभप्रियहृदय-देशप्रवेशे मर्मरसहचरभ्रमद्भृङ्गझङ्कारातिशर्मप्रदे विचित्रशक्र-शरासनाम्बुदवृन्दविडम्बितासमशरचित्रशाले वर्षाकाले नियमितचेतसो यतीनपि विवशयति मनोभववैभवं किं पुनर्गृहस्थितान् ।

**कश्यपः** - (सशिरःकम्पं दृष्टिसंज्ञया स्वीकरोति।)

**दितिः** - (अङ्गुल्या निर्दिश्य ।)

**धूम्रा धाराधरस्येयं धोरणी धूसरं ध्रुवम् ।।**
**धराधरं धरां धैर्य्यं वधूटीनां करोत्यहो ।।२४।।**

**कश्यपः** - (भ्रूसंज्ञया स्वीकरोति ।)

**दितिः** - (स्वगतम् ।) (सविक्लवम् ।) हन्त किं करोमि । कामः किल काममाकर्णाकृष्टक्रूरकाण्डप्रहारं मय्येव करोति ।

**सद्गुणचापशरैः संयुक्तोऽयं काल एव ननु कालः ।।**
**प्रियसम्भावनसुसुधारहितानां कामिनीसमूहानाम् ।।२५।।**

(प्रकाशम् ।) ननु किञ्चिद्विज्ञाप्यमस्ति प्रत्युत्तरवितरणीभवति चेदार्यपुत्रः ।

**कश्यपः** - (शिरःसंज्ञया स्वीकरोति ।)

**दितिः** -

**अपि नाम समाः सर्वा गृहाधीशस्य मां पुनः ।।**
**तथापि बाधते दुःखमनपत्यत्वसम्भवम् ।।२६।।**

**कश्यपः** - (सश्लाघम् ।) अयि प्रिये नात्मानमकृतार्थं समर्थयितुमर्हसि मह्यं चाभ्यसूचयितुम् ।

**दितिः** - (सदैन्यम् ।) नाथ नाहं तुभ्यमभ्यसूये किन्तु इदं प्रार्थये ।

**सपत्नीनां समृद्धिर्मां प्राज्या दहति नित्यशः ॥**
**कृपामृतसुवृष्ट्या त्वं तापहीनां विधेहि माम् ॥२७॥**

**कश्यपः** - अवधारयतु भवती मद्वचनम् ।

**रचिते नव्योद्याने समकालं नो फलन्ति भूमिरुहाः ॥**
**प्राप्ते स्वे स्वे काले भवन्ति सफला विचित्रपरिणामाः ॥२८॥**

**दितिः** - (स्वगतम् ।) सत्यमुक्तं परं न केवलं प्रजाकामः कित्वनङ्गोऽपि क्रूरः कृणाति मां कथं कथयामि ।

**कश्यपः** -

**आज्ञेयं तातपादानां यद्विज्ञाप्यं तवाऽनघे ॥**
**भार्या त्वत्सदृशी तस्याः को न कुर्यान्मनीषितम् ॥२९॥**

अचिरादेव ते मनीषितं स्यात् ।

**दितिः** - (स्वगतम् ।) प्रजाकाममुद्दिश्येयमुक्तिरार्यपुत्रस्य । कथं तावदहं कामपीडां निवेदयेऽसमुदाचारः किल कुलाङ्गनानाम् । (इति अङ्गुष्ठेन भूमिमुल्लिखन्त्यधोदृष्टिस्तिष्ठति ।)

**कश्यपः** - (तच्छोभामवलोक्य । स्वगतम् ।)

**तन्वंग्यंगुष्ठः किल नखवसुदानं करोति वसुधायै ॥**
**जननान्तरेऽप्यवाप्तुं ह्येतत्पादं सरोरुहैः श्लाघ्यम् ॥३०॥**

किञ्च ।

**श्रुतिपथसंश्रयिणीयं दृष्टिर्गच्छत्यधः कथं तन्व्याः ॥**
**लोके वक्रतराणां गतिरेषेति प्रसिद्धये नूनम् ॥३१॥**

**दितिः** - (सानङ्गकश्मलम् ।) (स्वगतम् ।) कथं वा भवतु कथयाम्येव । (प्रकाशम् ।)

**भो भो कञ्जविलोचन प्रकृतितः क्रूरः कृणाति प्रभो**
**कामः काममहो शरैः खरतरैरेतं जनं यत्नतः ॥**

**तत्त्रायस्व विचिन्त्य दैन्यममितं शीघ्रं घृणाघूर्णितं**
**मत्वा त्वां शरणं गतं किल निजा रक्ष्या महद्भिर्भयात् ।।३२।।**

**कश्यपः** - (सस्मितम् ।) अयि ।

**प्राणप्रेष्ठतमे विशालनयने रम्ये सुचन्द्रानने**
**दैन्यं मा भज मा भज प्रकृतितः स्निग्धस्तवायं जनः ।।**
**कामं पूरयितुं त्वदीयमधुनाऽप्येतावती प्रार्थना**
**कालं सम्प्रति पालयस्व सुभगे यावन्न सन्ध्योत्क्रमः ।।३३।।**

यतः ।

**यस्यां भूतपिशाचसङ्घनिबिडप्रान्ताग्रभागः शिवां**
**शूलं भस्म गजाजिनं फणिपतीन् गङ्गार्द्धचन्द्रौ विषम् ।।**
**बिभ्राणोऽटति भूतराट् नरशिरोमालां च नन्दीश्वरं**
**घण्टाटङ्कृतिशब्दिताखिलदिशं ह्यारुह्य लोकेऽनिशम् ।।३४।।**

**दितिः** - (स्वगतम् ।) अहह किं करोमि । किमाचरामि । मौहूर्त्तिकान्तराय-स्त्वसोढव्यः । पुनरार्यपुत्रस्य महर्षेरियमाज्ञा । (पुनर्विमृश्य ।)

**धर्माचारपरा लोके प्राणिनो नो विचेतनाः ।।**
**तस्मात्केनाऽप्युपायेन रक्ष्याः प्राणा हि तत्कृते ।।३५।।**

तत्केन कामशराद्रक्षणं स्यात् । (पुनर्विमृश्य ।) ह्रीत्याग एव शरणम् । (इति ऋषेरुत्तरीयाञ्चलं धृत्वा कर्षति ।)

**कश्यपः** - अयि कामिनि प्रसीद नैवं कर्तुमर्हसि ।

**दितिः** - (सकामकश्मलम् ।)

**कामाग्नितप्तदेहां मामधरामृतसेचनैः ।।**
**शीतलां कुरु ते दास्यं वहामि शिरसा मुने ।।३६।।**

**कश्यपः** - (सदयम् ।) हन्त वामोरु एवमेव चेत्तर्ह्येहि शयनशालां प्रविशावः।

(इति निष्क्रान्तौ ।)

**।। इति श्रीनृसिंहविजयनाम्नि नाटके प्रथमोऽङ्कः ।।**